॥ओ३म्॥

# पतंजलि विश्वविद्यालय, हरिद्वार

## मुख्य परीक्षा - मार्च 2021

कक्षा - बी०ए० व्याकरण, तृतीयपत्रम् | पूर्णांक - 70

विषय - संस्कृतसाहित्यम् | पेपर कोड - BV-103

सेमे० - 03 | समय -3 घंटे

### खण्ड - 'क' (कौटलीयार्थशास्त्रम्)

एषु चतुर्णाम् उत्तरं लेखनीयम्। (4x5=20)

**प्रश्नः - 1**. विष्णुगुप्तमते कति विद्याः, किञ्च तासां स्वरूपं प्रयोजनञ्च?

**प्रश्नः - 2**. विष्णुगुप्तनिर्दिष्टं चातुर्वर्ण्यस्य स्वरूपं कर्तव्यञ्च प्रतिपादयत।

**प्रश्नः - 3**. निम्नगद्यस्य व्याख्या करणीया - तस्माद्दण्डमूलास्तिस्रो विद्याः। विनयमूलो दण्डः प्राणभृतां योगक्षेमावहः। कृतकस्स्वाभाविकश्च विनयः। क्रिया हि द्रव्यं विनयति नाद्रव्यम्। शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिष्टबुद्धिं विद्या विनयति नेतरम्। विद्यानाञ्च यथास्वमाचार्यप्रामाण्यात् विनयो नियमश्च।

**प्रश्नः - 4**. कामजं त्रिवर्गं वर्णयत?

**प्रश्नः - 5**. कोपजं त्रिवर्गं वर्णयत?

**प्रश्नः - 6**. गद्यस्योद्भवं विकासञ्च प्रतिपादयत?

### खण्ड - 'ख' (दूतवाक्यम्)

**प्रश्नः - 7**. दूतवाक्यानुसारेण श्रीकृष्णस्य चरित्रं चित्रयत। (05)

**प्रश्नः - 8**. भासस्य परिचयं तदीयनाट्यरचनाकौशलं च प्रकटयत। (05)

**प्रश्नः - 9**. दूतवाक्यस्य कथावस्तु संक्षेपतः लेखनीयम्। (05)

**प्रश्नः - 10**. निम्नाङ्कितेषु द्वयोः श्लोकयोः छन्दोलङ्कारनिर्देशपुरस्सरं व्याख्या कार्या। (10)

सेनानिनादपटहस्वनशङ्खनादैश्चण्डानिलाहतमहोदधिनादकल्पैः।
गाङ्गेयमूर्ध्नि पतितैरभिषेकतोयैः सार्धं पतन्तु हृदयानि नराधिपानाम्॥
ग्रहणमुपगते तु वासुभद्रे हृतनयना इव पाण्डवा भवेयुः।
गतिमतिरहितेषु पाण्डवेषु क्षितिरखिलापि भवेन्ममासपत्ना॥
प्रहरति यदि युद्धे मारुतो भीमरूपी प्रहरति यदि साक्षात्पार्थरूपेण शक्रः।
परुषवचनदक्ष त्वद्वचोभिर्न दास्ये तृणमपि पितृभुक्ते वीर्यगुप्ते स्वराज्ये॥
प्राप्तः किलाद्य वचनादिह पाण्डवानां दौत्येन भृत्य इव कृष्णमतिः स कृष्णः।
श्रोतुं सखे त्वमपि सज्जय कर्ण कर्णौ नारीमृदूनि वचनानि युधिष्ठिरस्य॥

## **खण्ड - 'ग'** (काव्यशास्त्रम्)

**प्रश्नः - 11**. केचन पञ्च प्रश्नाः समाधेयाः। (5x5=25)

1. लक्षणालक्षणं निरूपयत।
2. व्यञ्जनालक्षणं प्रतिपादयत।
3. लक्षणाभेदान् प्रकटयत।
4. लक्षणाश्रयां व्यञ्जनां निरूपयत।
5. काव्यप्रयोजनानि वर्णयत।
6. कथ्यते काव्यमिष्टार्थव्यवच्छिन्ना पदावली इति सोदाहरणं व्याख्यायताम्।
7. आर्थीं व्यञ्जनां प्रतिपादयत।

***************